श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ अभिषेकपद्धतिः सप्तमी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ अभिषेकपद्धतिः सप्तमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

पाहि नः पादुके ! यस्याः विधास्यन् अभिषेचनम्।
आभिषेचनिकं भाण्डं चक्रे रामः प्रदक्षिणम् ॥ 7.1 ॥

राघवस्य चरणौ पदावनि !
प्रेक्षितुं त्वदभिषेकमीषतुः।
आभिषेचनिकभाण्डसन्निधौ
यत्प्रदक्षिणगतिः शनैर्ययौ ॥ 7.2 ॥

मूर्धाभिषिक्तैर्नियमेन वाह्यौ
विचिन्त्य नूनं रघुनाथपादौ।
रत्नासनस्थां मणिपादुके ! त्वां
रामानुजन्मा भरतोऽभ्यषिञ्चत् ॥ 7.3 ॥

भ्रातुर्नियोगेऽप्यनिवर्तमानं
राज्याभिषेकं च परित्यजन्तम्।
रामानुजौ तौ ननु पारतन्त्र्यात्
उभावुभाभ्यां भवती जिगाय ॥ 7.4 ॥

निवेश्य रङ्गेश्वरपादरक्षे !
भद्रासने सादरमभ्यषिञ्चत्।

वशी वसिष्ठो मनुवंशजानां
    महीक्षितां वंशपुरोहितस्त्वाम् ॥ 7.5 ॥

कृताभिषेका भवती यथावत्
    रङ्गेशपादावनि ! रत्नपीठे।
गङ्गानिपातस्नपितां सुमेरोः
    अधित्यकाभूमिमधश्चकार ॥ 7.6 ॥

वसिष्ठमुख्यैर्विहिताभिषेकां
    राज्यासने रामनिवेशयोग्ये।
तुष्टाव रङ्गेश्वरपादरक्षे !
    प्राचेतसस्त्वां प्रथमः कवीनाम् ॥ 7.7 ॥

रक्षोवधार्थं मणिपादरक्षे !
    रामात्मनो रङ्गपतेः प्रवासे।
रक्षोपकाराद्भवती वितेने
    राजन्वतीं कोसलराजधानीम् ॥ 7.8 ॥

प्राप्ताभिषेका मणिपादरक्षे !
    प्रतापमुग्रं प्रतिपद्यमाना।
शशास पृथ्वीं भवती यथावत्
    साकेतसिंहासनसार्वभौमी ॥ 7.9 ॥

दशाननादीन् मणिपादरक्षे !
    जिगीषतो दाशरथेर्वियोगात्।
जातोपतापा त्वयि संप्रयुक्तैः
    तीर्थोदकैरुच्छ्वसिता धरित्री ॥ 7.10 ॥

अध्यासितं मनुमुखैः क्रमशो नरेन्द्रैः
    आरोप्य देवि ! भवतीं तपनीयपीठम्।

राज्याभिषेकमनघं मणिपादरक्षे !
    रामोचितं तव वशं भरतो वितेने ॥ 7.11 ॥

स्नेहेन देवि ! भवतीं विषयेऽभिषिञ्चन्
    द्विस्सप्तसङ्ख्यभुवनोदरदीपरेखाम् ।
जातं रघूद्वहदिवाकरविप्रयोगात्
    अन्धं तमिस्रमहरद्भरतः प्रजानाम् ॥ 7.12 ॥

हस्तापचेयपुरुषार्थफलप्रसूतेः
    मूलं पदावनि ! मुकुन्दमहीरुहस्त्वम् ।
छायाविशेषमदिशद्यदसौ प्रजानाम्
    आवर्जितैस्त्वयि शुभैरभिषेकतोयैः ॥ 7.13 ॥

अह्नाय रामविरहात्परिखिन्नवृत्तेः
    आश्वासनाय भवती मणिपादरक्षे !।
तीर्थाभिषेकमपदिश्य वसुन्धरायाः
    चक्रे तदा समुचितं शिशिरोपचारम् ॥ 7.14 ॥

मालिन्यमाश्रितवती मणिपादरक्षे !
    पङ्केन केकयसुताकलहोत्थितेन ।
शुद्धिं परामधिजगाम वसुन्धरेयं
    त्वत्तः क्षणान्निपतितैरभिषेकतोयैः ॥ 7.15 ॥

आवर्जितं मुनिगणेन जगद्विभूत्यै
    तोयं पदावनि ! तदा त्वयि मन्त्रपूतम् ।
मूलावसेकसलिलं निगमद्रुमाणां
    शापोदकं च समभूत्क्षणदाचराणाम् ॥ 7.16 ॥

विप्रोषिते रघुपतौ भवती यथार्हे
    मान्ये पदे स्थितिमती मनुवंशजानाम् ।

आत्मन्यथर्वनिपुणैः प्रहितैः प्रजानाम्
    अश्रूण्यपास्यदभिषेकजलप्रवाहैः॥ **7.17** ॥

प्रायो विशोषितरसा पतिविप्रयोगात्
    पर्याकुलीकृतसमुद्रपयोधरा गौः।
अम्ब ! त्वदीयमभिषेकपयः पिबन्ती
    धेनुर्बभूव जगतां धनधान्यदोग्ध्री॥ **7.18** ॥

वृत्ते यथावदभिषेकविधौ बभासे
    पश्चात्तवाम्ब ! भरतेन धृतः किरीटः।
आकस्मिकस्वकुलविप्लवशान्तिहर्षात्
    प्राप्तस्त्विषामिव पतिर्मणिपादुके ! त्वाम्॥ **7.19** ॥

मनुवंशपुरोहितेन मन्त्रैः
    अभिमन्त्र्य त्वयि पादुके ! प्रयुक्तम्।
अभिषेकजलं क्षणेन राज्ञां
    शमयामास समुत्थितान् प्रतापान्॥ **7.20** ॥

पादपादुपहृता रघूद्वहात्
    आलवालमिव पीठमाश्रिता।
अभ्यषेचि भवती तपोधनैः
    पारिजातलतिकेव पादुके !॥ **7.21** ॥

अलघुभिरभिषेकव्यापृतैरम्बुभिस्ते
    दिनकरकुलदैन्यं पादुके ! क्षाळयिष्यन्।
स खलु कमलयोनेः सूनुराधत्त मन्त्रे -
    ष्वधिकनियमयोगां शक्तिमाथर्वणेषु॥ **7.22** ॥

दिनकरकुलजानां देवि ! पृथ्वीपतीनां
    निरुपधिमधिकारं प्राप्नुवत्यां भवत्याम्।

अजनिषत समस्ताः पादुके ! तावकीन -
　　स्नपनसलिलयोगान्निम्नगास्तुङ्गभद्राः ॥ 7.23 ॥

तव विधिवदुपात्ते सार्वभौमाभिषेके
　　भरतसमयविद्भिः पादुके ! मन्त्रिमुख्यैः।
त्वदवधिनिजकर्मस्थायिनीनां प्रजानां
　　प्रथमयुगविशेषाः प्रादुरासन् विचित्राः ॥ 7.24 ॥

अवसितरिपुशब्दानन्वभूस्त्वं तदानीं
　　रघुपतिपदरक्षे ! लब्धराज्याभिषेका।
चलितभुजलतानां चामरग्राहिणीनां
　　मणिवलयनिनादैर्मेदुरान् मन्त्रघोषान् ॥ 7.25 ॥

समुचितमभिषेकं पादुके ! प्राप्नुवत्यां
　　त्वयि विनिपतितानां देवि ! तीर्थोदकानाम्।
ध्वनिरनुगतमन्त्रः सीदतां कोसलानां
　　शमयितुमलमासीत्सङ्कुलानार्तनादान् ॥ 7.26 ॥

दिविषदनुविधेयं देवि ! राज्याभिषेकं
　　भरत इव यदि त्वं पादुके ! नान्वमंस्थाः।
कथमिव रघुवीरः कल्पयेदल्पयत्नः
　　त्रिचतुरशरपातैस्तादृशं देवकार्यम् ॥ 7.27 ॥

कतिचन पदपद्मस्पर्शसौख्यं त्यजन्ती
　　व्रतमतुलमधास्त्वं वत्सरान् सावधाना।
रघुपतिपदरक्षे ! राक्षसैस्त्रासितानां
　　रणरणकविमुक्तं येन राज्यं सुराणाम् ॥ 7.28 ॥

अथर्वोपज्ञं ते विधिवदभिषेकं विदधतां
　　वसिष्ठादीनामप्युपचितचमत्कारभरया।

त्वदास्थान्या रङ्गक्षितिरमणपादावनि ! तदा
लघीयस्यो जाता रघुपरिषदाहोपुरुषिका: ॥ 7.29 ॥

अभिषेचयतु स रामः पदेन वा स्पृशतु पादुके ! भवतीम्।
अविशेषितमहिमा त्वं क्व वा विशेषः क्षमासमेतानाम् ॥ 7.30 ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे अभिषेकपद्धतिः सप्तमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥